# Shri Raghavendra Gururajastavaraja

# શ્રીરાઘવેન્દ્રગુરુરાજસ્તવરાજઃ

## Document Information

Text title : Shri Raghavendra Gururajastavaraja

File name : rAghavendragururAjastavarAjaH.itx

Category : deities_misc, gurudev, stavarAja

Location : doc_deities_misc

Author : Krishna Avadhutapandita Vedavyasacharya

Proofread by : Gopalakrishnan, PSA Easwaran

Description/comments : from Raghavendra Tantram

Latest update : December 18, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 18, 2021

*sanskritdocuments.org*

Shri Raghavendra Gururajastavaraja

# શ્રીરાઘવેન્દ્રગુરુરાજસ્તવરાજઃ

અથ કૃષ્ણાવધૂતોઽહં ગુરુરાજપ્રિયઃ સુતઃ ।
વક્ષ્યે મયિ પિતુસ્તસ્ય કૃપાં સર્વાતિશાયિનીમ્ ॥ ૧॥

યદ્યપ્યેતન્ન પ્રકાશ્યં રહસ્યં વિસ્મયપ્રદમ્ ।
તથાપિ વક્ષ્યે ગ્રન્થેઽસ્મિન્ પ્રત્યયાર્થં તદાજ્ઞયા ॥ ૨॥

કદાચિદ્બન્ધુ-દારિદ્ય-ઋણ-રાજાદિ પીડિતઃ ।
ભૃશં શોચન્ ગુરું ધ્યાયન્ ન સ્વાપ્સ્વં કલુષાશયઃ ॥ ૩॥

તતઃ સૂર્યોદયે કાલે સ્વપ્ને કોઽપિ યતીશ્વરઃ ।
આકટીર્જાનુપર્યન્તં ઋદ્ધકાષાયવસ્ત્રવાન્ ॥ ૪॥

તુલસી મણિ માલાભ્યાં શોભિતેન વિવાસસા ।
વિશાલવક્ષસા તૈલસ્નિગ્ધશ્યામલવર્ચસા ॥ ૫॥

અપ્રાવૃતેન શિરસા પાદુકાભ્યાં ચ રાજતઃ ।
શિષ્યેણાનુગતઃ પશ્ચાત્ જલપાત્રધરેણ ચ ॥ ૬॥

વેગાદાગત્ય માં હસ્તે ગૃહીત્વાન્તરુપાગતઃ ।
શિષ્યસ્તુ દ્વાર એવાસીદુપાવિશદસૌ ગુરુઃ ॥ ૭॥

અથ માં પ્રાણિનં સન્તં વત્સેત્યામન્ત્ર્ય સોઽબ્રવીત્ ।
પ્રદર્શયંસ્તામ્રપત્રં લિખિતં નાગરાક્ષરૈઃ ॥ ૮॥

આત્મેત્યેવ પરં દેવમુપાસ્વ હરિમવ્યયમ્ ।
પ્રાણસ્યેદં વશે સર્વં પ્રાણઃ પરવશે સ્થિતઃ ॥ ૯॥

વિષ્વક્સેનઃ વાયુપુત્રઃ પ્રહ્લાદઃ પ્રથમો મતઃ ।
વિભીષણોઽથ બાહ્લીકો વ્યાસોઽહં સત્યસન્ધકઃ ॥ ૧૦ ॥

સંહતપ્રહતૌ સન્ધિપ્રસન્ધી સોમિકોર્મિકૌ ।
અપ્પણાચાર્યકૃષ્ણૌ ચ સેવકૌ મે યુગક્રમાત્ ॥ ૧૧॥

મય્યધિષ્ઠાય તે ભારં સમન્મન્ત્રાદ્યુપાસનમ્ ।
ગ્રન્થં કમપિ કર્તું ત્વં પ્રારભસ્વ ભયં ન તે ॥ ૧૨॥

યોગ્યતામનુસૃત્યાહમયોગ્યેચ્છાં નિવારયન્ ।
વિપત્તીઃ પરિહૃત્યા તે સુખં દાસ્યામિ પુત્રક ॥ ૧૩॥

ઓમિત્યુક્ત્વા યતિસ્તચ્ચ તામ્રપત્રં તથાક્ષતાન્ ।
દત્વા મહ્યમદૃશ્યોઽભૂત્ પ્રબુદ્ધોઽહં તતઃ ક્ષણાત્ ॥ ૧૪॥

અપશ્યં શિરસઃ સ્થાને સાક્ષતાં તામ્રપત્રિકામ્ ।
શાન્તઃ શોકસ્તદા મેઽભૂદાસારૈઃ પાદપો યથા ॥ ૧૫॥

ચિત્તં પ્રસન્નમભવદ્યથામ્ભઃ કુમ્ભજોદયાત્ ।
તતઃ શ્રીરાઘવેન્દ્રાર્યગુરું મોદાદપૂજયમ્ ॥ ૧૬॥

આરિરમ્ભયિષુર્ગ્રન્થં રાઘવેન્દ્રાર્યતન્ત્રકમ્ ।
અસ્તૌષં સ્તવરાજેન ભક્ત્યુન્માદભ્રમન્મનાઃ ॥ ૧૭॥

શ્રીરાઘવેન્દ્રાર્ય પિતા ત્વમેવ ત્વમેવ મે સદ્ગતિહેતુભૂતઃ ।
ઇમં ચ શોકં મમ નાશયાશુ ક્ષમસ્વ મે સર્વમહાપરાધમ્ ॥ ૧૮॥

કલ્યાવેશેન કલુષં વિષયાસક્તચેતસમ્ ।
સ્નાનસન્ધ્યાદિભિર્હીનં ભક્તિહીનં હરૌ ગુરૌ ॥ ૧૯॥

સાધૂનાં સઙ્ગરહિતં દુષ્ટાનાં સઙ્ગતે સ્થિતમ્ ।
દુર્માર્ગે સર્વદા સન્તં રાઘવેન્દ્રાર્ય રક્ષ મામ્ ॥ ૨૦॥

રક્ષણીયમરક્ષન્તં રક્ષણાનર્હરક્ષકમ્ ।
દાક્ષિણ્યાદર્થલોભાદ્વા દુર્વ્યાપારં સુવઞ્ચકમ્ ॥ ૨૧॥

યન્ત્રબદ્ધપશુપ્રાયં ભ્રમમાણં કુયોનિષુ ।
અનાલમ્બનમત્યાર્તં રાઘવેન્દ્રાર્ય રક્ષ મામ્ ॥ ૨૨॥

જન્મમૃત્યુજરાવ્યાધિપીડિતશ્ચ સ્વકર્મભુક્ ।
દારિદ્ર્યમતિતીર્ષશ્ચ સંસારવ્યસનાતુરઃ ॥ ૨૩॥

દાતું ભોક્તું મહાલુબ્ધી વૈભવેઽપિ કદન્નભુક્ ।
પરાન્નપરિતુષ્ટોઽહં રાઘવેન્દ્રાર્ય રક્ષ મામ્ ॥ ૨૪॥

ક્ષણશઃ કણશોઽપ્યર્થં સઙ્ગૃહ્ય ચ પિશાચવત્ ।
રક્ષન્નદાતા ચાભોક્તા દુર્મુખો દુરહઙ્કૃતિઃ॥ ૨૫॥

પુત્રપત્નીગૃહાદ્યેષુ સક્તોઽહં ભર્ત્સિતોઽપિ તૈઃ ।
કર્મજ્ઞાનેન્દ્રિયૈઃ પાપી ગુરુરાજાનુરક્ષ મામ્ ॥ ૨૬॥

ગુરુવાર્યે પુરાણાદાવનાદરણશાલિનઃ ।
ત્વદ્ભક્તાન્ વિષ્ણુભક્તાંશ્ચાપ્યવજ્ઞાતુશ્ચ સજ્જનાન્ ॥ ૨૭॥

સ્વમાહાત્મ્યપ્રકાશાર્થમત્યન્તાનૃતભાષિણઃ ।
ગુરુબ્રાહ્મણદેવાનાં પૂજાં દમ્ભેન કુર્વતઃ ॥ ૨૮॥

અપરાધાનનેકાન્ મે ક્ષમસ્વ મયિ વત્સલઃ
પઞ્ચયજ્ઞાદ્યકરણાદતિથીનામુપેક્ષણાત્ ॥ ૨૯॥

શ્રૌતસ્માર્તાગ્નિરાહિત્યાદ્ અમાશ્રાદ્ધાદ્યભાવતઃ ।
હવ્યકવ્યાદિ લોપાચ્ચ પઙ્ક્તિભેદાચ્ચ પાતકાત્ ॥ ૩૦॥

અભક્ષ્યભક્ષણાચ્છાદિ પાત્રાપાત્રાવિવેચનાત્ ।
વર્ણોક્તાચારરાહિત્યાદ્રાઘવેન્દ્રાર્ય રક્ષ મામ્ ॥ ૩૧॥

નીચસેવાલેખ્યવૃત્તિ માઢાપત્યાદિ જીવનાત્ ।
અસત્સુ પક્ષપાતાચ્ચ પૌરોહિત્યાત્ દુરન્નતઃ ॥ ૩૨॥

દિવા-સન્ધ્યારજઃ શ્રાદ્ધ-પર્વાદિષુ વધૂરતેઃલ્
ઋતૌ પત્ન્યનુગમનાત્ પાતકાદ્રક્ષ માં ગુરો ॥ ૩૩॥

કન્યાગોઽજાદિમહિષીઘૃતતૈલાદિ વિક્રયાત્ ।
એકાદશ્યન્નનિઘસાદ્દ્વાદશ્યુલ્લઙ્ઘનાદપિ ॥ ૩૪॥

દિવાસ્વાપાત્પરસ્ત્રીણાં વિધવાનાં ચ સઙ્ગતઃ ।
પત્નીસુતાદિનિર્વ્યજત્યાગાત્ તાતાવ માં ગુરો ॥ ૩૫॥

પરસ્ત્રીગણિકાદીનાં પુરુષસ્યાનુકૂલનાત્ ।
હિંસનાદ્રોદ્વિજસ્ત્રીણાં જારગર્ભનિપાતનાત્ ॥ ૩૬॥

નરસ્તુતિર્દ્યૂતચૌર્યાદ્ભાર્યાપણ્યેન જીવનાત્ ।
જારજાનાં સ્વપુત્રાણાં લાલનાચ્ચાવ માં ગુરો ॥ ૩૭॥

વિષાગ્નિશસ્ત્રપાષાણગલબન્ધાભિચારકૈઃ ।
હિંસનોચ્ચાટનાદ્બન્ધુમાતાપિત્રાદિવર્જનાત્ ॥ ૩૮॥

સ્વવસ્ત્રાદિદૂષણાત્ પત્નીપતિવિદ્વેષવશ્યતઃ ।

મિત્રભિત્ કૂટસાક્ષિત્વાદ્રાઘવેન્દ્રાર્ય રક્ષ મામ્ ॥ ૩૯॥

જ્ઞાત્વાપિ જારિણીં પત્નીં તયા સઙ્ગમ્ય લોભતઃ ।
વંશાધઃપાતનાત્ તસ્યામપત્યોત્પાદનાદપિ ॥ ૪૦॥

પરસ્વ-પરપત્નીનાં બલાદનુભવાદપિ ।
ઋણાપહરણાચ્ચાપિ મામુદ્ધર કૃપાનિધે ॥ ૪૧॥

ઇત્યાદિ બહુપાપૌઘાત્ જ્ઞાત્વાઽજ્ઞાત્વા કૃતાદપિ ।
તાત શ્રીરાઘવેન્દ્રાર્ય પરિપાલય માં સુતમ્ ॥ ૪૨॥

પાપિનામગ્રગણ્યોઽહં દયાલૂનાં ત્વમગ્રણીઃ ।
ત્વાં વિના ન હિ જાનેઽન્યં મમાઘોદ્ધારકારણમ્ ॥ ૪૩॥

શ્રીરાઘવેન્દ્ર ગુરુરાજ કૃપાસમુદ્ર
    કારુણ્યપૂર્ણકરુણાજલધે કૃપાબ્ધે ।
ભક્તાનુકમ્પિતમનો દયાપયોધે-
    ઽનુક્રોશસાન્દ્ર કરુણાલય માં પ્રપાહિ ॥ ૪૪॥

ઇતિ કૃષ્ણાવધૂતેન ગુરુપાદાનુજીવિના ।
સ્તવરાજમિમં પ્રોક્તં રહસ્યં પાપનાશકમ્ ॥ ૪૫॥

પઠતાં સર્વપાપાનિ નશ્યન્ત્યેવ ન સંશયઃ ।
ઇદં દત્તવરસ્તોત્રં ગુરુરાજેન સાદૃતમ્ ॥ ૪૬॥

પ્રગોપ્તવ્યં પ્રયત્નેન દદ્યાચ્છ્રદ્ધાલવે ગુરૌ ।
અભક્તાય ન દાતવ્યં કલિદોષનિવારકમ્ ॥ ૪૭॥

દિનં વા સકૃદપ્યેતત્ પઠતાં યોગ્યતામનુ
અનાચારરતાનાં વા વર્તતે પિતૃવદ્ગુરુઃ ॥ ૪૮॥

બાલોઽસત્યં વદતિ પિતરં સ્વાપરાધેઽપિ ધાર્ષ્ટ્યા
તાત ત્વં મેઽવદ ઇદમતોઽકાર્ષમેતત્તથેતિ ॥ ૪૯॥

શ્રુત્વા તાતસ્તનયવચનં પ્રેમતો મોદતે હિ ।
ત્વં મોદેથાઃ શિશુવચસિ મે રાઘવેન્દ્રાર્ય તાત ॥ ૫૦॥

ગુરુરાજ પિતા મે કૃપાવાનિતિ નિશ્ચિત્ય મયોદ્ધતં વ્યચારિ ।
ત્વદનન્યગતીર્મમાપરાધાન્ સુતવાત્સલ્યમુપાગતઃ ક્ષમસ્વ ॥ ૫૧॥

ઇતિ શ્રીકૃષ્ણાવધૂતવિરચિતે શ્રીરાઘવેન્દ્રતન્ત્રે પ્રત્યક્ષસિદ્ધિપ્રદે

રહસ્યોપાખ્યાને ગુરુરાજસ્તવરાજો નામ પઞ્ચદશપટલઃ ।

Proofread by Gopalakrishnan, PSA Easwaran

*Shri Raghavendra Gururajastavaraja*
pdf was typeset on December 18, 2021

Please send corrections to *sanskrit@cheerful.com*